**19R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जानेवारी – २०२३**

**सत्र ६ वे**

**विषयः कादम्बरी (19R462)**

**दिनांक :** ०४/०१/२०२३ **गुण : ६०** **वेळ : दु. २.०० ते ४.३०**

**सूचना : सर्व प्रश्न अनिवार्य**

**प्र.१. त्रयाणांमनुवादं ससंदर्भं मातृभाषया ।** (१८)

१) नमामि भत्सोश्चरणाम्बुजद्वयं सशेखरैर्मौखरिभिः कृतार्चनम् समस्तसामन्तकिरीटवेदिकाविटङ्कपीठोल्लुठितारुणाङ्गुलि।।
अकारणाविष्कृतवैरदारुणादसज्जानात्कस्य भयं न जायते
विषं महाहेरिव यस्य दुर्वचः सुदुःसहं संनिहितं सदा मुखे।।

२) अथ प्रतीहारी नरपतिकथनानन्तरमुत्थाय तां मातङ्गकुमारी प्रावेशयत् । प्रविश्च च सा नरपरिसहस्रमध्यवर्तिन – मशनिभयपुञ्जिकुलशैलमध्यगतमिव कनकशिखरिणम्, अनेकरत्नाभरणाकिरणजालकान्तारितावयवमिन्द्रायुध– सहस्रसंछादिताष्टदिग्भागमिव जलधरदिवसम् उन्मयूखकान्तिविजयपराभवप्रणते शशिनीव स्फटिकपादपीठे विन्यस्तवामपादम्, अमलमणिकुट्टिमसंक्रान्तदेहप्रतिबिम्बतया पतिप्रेम्णा वसुन्धरया हृदयेनेवोह्यमानं राजानमद्राक्षीत्।

३) राजा तु तामार्यां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तितम्, अतिमहार्घहेमासनोपविष्टम्, अमरगुरुमिवाशेषनीतिशास्त्रपारगम्, अतिवयसम्, अग्रजन्मानम्, अखिले मन्त्रिमण्डले प्रधानामात्यं कुमारपलितनामानमब्रवीत्–श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता। प्रथमं तावदिदमेव महदाश्चर्यम्, यदयमसंकीर्णवर्णप्रविभागामभिव्यक्तमात्रानुस्वारसंस्कारयोगां विशेषसंयुक्तां गिरमुदीरयति।

४) एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत् आस्तां तावत्सर्वम् अपनयतु नः कुतूहलम्।
अवेदयतु भवानदितः प्रभृति कार्त्स्न्यैनात्मनो जन्म कस्मिन्देशे, भवान्कथं जातः केन वा
नाम कृतम्, का त माता, कस्ते पिता, कथं वेदानामागमः, कथं शास्त्राणां परिचयः, कुतः
कला आसादिताः किंहेतुकं जन्मान्तरानुस्मरणम्, उत वरप्रदानम्, अथवा विहङ्गवेषधारी
कश्चिच्छन्नं निवससि, क्व वा पूर्वमुषितम् कियद्वा वयः, कथं पञ्जरबन्धनम्, कथं
चाण्डालहस्तगमनम्, इह वा कथमागमनम् इति। वैशम्पायनस्तु स्वयमुपजातकुतूहलेन
सबहुमानमवनिपतिना, पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत् देव महतीयं कथा। यदि कौतुकमाकर्ण्यताम्।

**प्र.२. ससन्दर्भं स्पष्टीकरणं कुरुत। (केवलं चत्वारः)** (२४)

१) नृसिंहस्य नखाङ्कुरा इव।
२) कुपतिमपि कलत्रवल्लभम्।
३) विमानीकृतराजहंसमण्डलः।
४) किरातवेषामिव भवानीम्।
५) सर्वरत्नानामुदधिरिव देवो भाजनम्।

**प्र.३. टिप्पणीद्वयं लिखत।** (१२)

१) वैशम्पायनः ताम शुकः।
२) विन्ध्याटवी – वर्णनम्
३) मातङ्गकन्यायाः सहचरौ।
४) शूद्रकस्य राजसभा।

**प्र.४. योग्यशब्दानां चयनं कृत्वा पुनर्निर्लखत।** (०६)

१) तस्य समस्तशास्त्रस्मृतिबन्धुरे मुखे–उवास। (कात्यायनी, गायत्री, सरस्वती)
२) अयम् ..... क्रियताम्। (आत्मनः, आत्मीयः, आत्मना)
३) आसने स्थितमपि -- निषण्णम्। (शास्त्रे, चापे, धनुषि)
४) -- भगवतो हरेरिव अनुकर्वती। (श्यामलतया, श्यामतया, श्यामया)
५) समुपजातविस्मयस्याभूत् मनसि -- । (राज्ञः शूद्रकस्य, महीपतेः)

----------